**संस्कृतवार्ताः**

**दिनाङ्क :- 06.06.2024**
**सायम् - 06:20**

-

**आदौ-मुख्यवार्ताः**

- राष्ट्रिय-जनतांत्रिक-ग्रन्थिबन्धनम् (NDA) केंद्रे सर्वकारस्थापनाय सज्जं वर्तते अपरत्र भाजपादलस्य अध्यक्षः जेपी-नड्डा नवदिल्ल्यां स्वकीये आवासे दलस्य वरिष्ठानेतृभिः सह उपवेशनं कृतवान्।
- सर्वोच्च-न्यायालयेन हिमाचल-प्रदेश-सर्वकारः जलापूर्ति-सङ्कटापन्नाय दिल्लीनगराय सप्त-त्रिंशदुत्तरैकशतं-क्यूसेक-परिमितम् अतिरिक्त-जलं विमुञ्चितुं निर्दिष्टः अस्ति।
- भारतीय-ऋतुविज्ञानविभागेन आगामि-षट्-दिवसेषु भारतस्य उत्तर-पूर्वक्षेत्रे, उप-हिमालयी-क्षेत्रे,पश्चिमबंगाले, सिक्किमे च वृष्टि-सम्भावना प्रकटिता अस्ति।
- फीफा-विश्य-चषकस्य प्र-प्रागुपान्त्यचक्रे कोलकातायां सायं भारतं कुवैतदलं सम्मुखीकरिष्यति।
- सरबजोतसिंहेन जर्मनीदेशसस्य म्यूनिखे आईएस्एस् एफ् विश्वचषके पुरुषवर्गे दशमीटरपरिमितस्य लक्ष्यभेदनस्पर्धायां स्वर्णपदकं विजितम्।

**अथ वार्ताः विस्तरेण**

**नड्डा-उपवेशनम्**

राष्ट्रिय-जनतांत्रिक-ग्रन्थिबन्धनम् (NDA) केंद्रे सर्वकारस्थापनाय सज्जं वर्तते अपरत्र भाजपादलस्य अध्यक्षः जेपी-नड्डा नवदिल्ल्यां स्वकीये आवासे दलस्य वरिष्ठानेतृभिः सह उपवेशनं कृतवान्। उपवेशने केन्द्रीय-मन्त्री दलस्य नेता च अमित-शाहः, राजनाथ-सिंहः, पीयूष-गोयलः, प्रह्लाद-जोशी, मनसुख-मंडाविया, अश्विनी-वैष्णवः, भाजपादलस्य राष्ट्रीय-महासचिवः तरुण-चुघः, अन्ये वरिष्ठनेतारः च उपस्थिताः आसन्। जदयू-प्रमुखः बिहारस्य मुख्यमंत्री च नीतीश-कुमारः अपि राष्ट्रीय-राजधान्यां स्वकीये आवासे दलस्य नेतृभिः सह उपवेशनम् अकरोत् । एतानि उपवेशनानि एनडीए-दलस्य नेतृभिः सर्वसम्मत्या नरेंद्र-मोदिनः स्वकीयनेतारूपेण चयनानन्तरं अग्रिमदिने सञ्जातानि । एनडीए-संसदीय-दलस्य उपवेशनं श्वः नवदिल्ल्यां भविष्यति। अस्मिन् उपवेशने बीजेपी, टीडीपी, जेडीयू, एलजेपी (आर), शिव-सेना (शिंदे-दलम्), जेडी (एस), एनडीए इत्यस्य अन्य-घटक-दलानि च नवनिर्वाचित-सांसदैः सह सम्मिलितं भवितुं

शक्नुवन्ति । ह्यः एनडीए-दलस्य उपवेशनावधौ, एकः प्रस्तावः पारितः यस्मिन् उल्लेखः कृतः अस्ति यत् श्री-मोदिनः नेतृत्वे भारतेन प्रत्येकक्षेत्रे सर्वांगीण-विकासः अवलोकितः अस्ति । प्रस्तावे इदमपि कथितं यत् देशस्य नागरिकैः षड्-दशकानाम् अनन्तरं निरन्तरं तृतीयवारं पूर्ण-बहुमतेन सह एकं सुदृढनेतृत्वं विचितम् अस्ति ।

**शपथग्रहणम्**

नरेन्द्रमोदिनः भारतस्य प्रधानमन्त्रीरूपेण तृतीयवारं शपथ-वचन-ग्रहणसमारोहात् पूर्वं सूचना-प्रसारण-सचिवः संजय-जाजू, प्रसार-भारत्याः मुख्यकार्याधिकारिः गौरवद्विवेदी, अखिल-भारतीय-रेडियो इत्यस्य उपमहानिदेशिका मौसमी-चक्रवर्ती, दूरदर्शनस्य महानिदेशकः कञ्चन-प्रसादः अन्ये वरिष्ठाधिकारिणः च, नवीदिल्ल्याः राष्ट्रपतिभवने प्रसारणप्रबन्धस्य समीक्षां निरीक्षणं च कृतवन्तः। अवधेयं यत् ह्यः एनडीए इत्यस्य सदस्यैः सर्वसम्मत्या प्रधानमन्त्रिपदाय, दलस्य नेतृत्वाय च नरेन्द्रमोदिनः नामाङ्कनस्य समर्थनं कृतम् ।

**सर्वोच्चन्यायालय-हिमाचलप्रदेशः**

सर्वोच्च-न्यायालयेन हिमाचल-प्रदेश-सर्वकारः जलापूर्ति-सङ्कटापन्नाय दिल्लीनगराय सप्त-त्रिंशदुत्तरैकशतं-क्यूसेक-परिमितम् अतिरिक्त-जलं विमुञ्चितुं निर्दिष्टः अस्ति । हिमाचल-प्रदेश-सरकारः न्यायमूर्तिः पी.के. मिश्रा , न्यायमूर्तिः के.वी. विश्वनाथन इत्यनयोः अवकाशपीठम् अकथयत् यत् न्यायालयस्य निर्देशे सर्वकारस्य कापि आपत्तिः न अस्ति सहैव सर्वकारः अतिरिक्तदलं विमोचितुं सज्जः अस्ति ।अवधेयं यत् शीर्षन्यायालयेन हरियाणा-सर्वकारः हिमाचल-प्रदेशेन विमोचितम् अतिरिक्त-जलप्रवाहं सुचारूरूपेण सञ्चालितुं निर्देशितः आसीत् येन राष्ट्रीय-राजधान्यां जलापूर्तिः सुलभं भवेत् । अस्मिन् प्रकरणे आग्रिम-निर्णयः जूनमासस्य दश-दिनाङ्के भविष्यति ।

**इज्रलि-हमास्**

गाजा-क्षेत्रे इज्रैल-कृतेषु विमान-आक्रमणेषु त्रिंशत् फिलिस्तीन-नागरिकाः मारिताः अनेके जनाः घातिताः च, येषु अधिकांशः बालकाः महिलाः च आसन् । मध्य-गाजा-पट्टिकायां विस्थापितानां नुसेराट्-शिबिरे एकं विद्यालयं लक्ष्यी-कृत्य विमानप्रहारः कृतः । इजरायलस्य युद्धक-विमानेन न्यूनातिन्यूनं तिसृषु कक्षासु बहुभिः क्षेपणास्त्रैः प्रहारः कृतः इति स्थानीयसूचनाभिः ज्ञातम् । इदानीं इजरायल-सैन्यबलेन स्वप्रतिक्रियायां प्रोक्तं यत् नुस्सिराट्-क्षेत्रे यूएनआरडब्ल्यूए-विद्यालयस्य अन्तस्थे हमास-परिसरे जाते प्रहारे अनेके आतङ्किनः मारिताः। गाजादेशे हमास-सङ्गठनस्य तस्य मित्रराष्ट्रानां च उपरि आरोपः प्रख्यापितः वर्तते यत् ते विद्यालयानां, चिकित्सालयाः, अन्येषां नागरिकमूल-संरचनानां च उपयोगं कुर्वन्ति ।

## बायोफार्मास्युटिक्स- गन्थिबंधनम्:

भारत, दक्षिणकोरिया, जापान, अमेरिका, यूरोपीय-संघः च अद्य सम्मिल्य बायोफार्मास्युटिकल इत्यस्मिन् क्षेत्रे अनवरता-आपूर्ति-श्रृंखला-सञ्चालनम् अधिकृत्य संयुक्त-प्रयासान् विधातुं एकं ग्रन्थिबंधनं समारब्धवन्तः । इयं घोषणा सैन-डिएगो, कैलिफ़ोर्नियायाम् आयेजिते विश्वस्य बृहत्तम-बायोफार्मास्युटिकल-प्रदर्शन्याः, बायो-इंटरनेशनल-कन्वेंशन्-इति कार्यक्रमस्य उद्घाटनोपवेशने कृता अस्ति । उपवेशने भागं भजितानां देशानां प्राशासनिक-अधिकारिणः जैवौषधि-उद्योगस्य प्रतिनिधियः च सहभागं कृतवन्तः। प्रतिभागिभिः विश्वसनीयायाः सुदृढायाः च आपूर्तिश्रृंखलायाः महत्वं सबलं प्रतिपादितम्।

## जद(यू)- कैबिनेटपदम्:

जदयू-दलेन अद्य प्रोक्तं यत् नूतने एनडीए-सर्वकारे मन्त्रिमण्डलपदस्य विषये किमपि अध्यर्थना न कृता अस्ति। अखिल-भारतीय-रेडियो-सञ्चारमाध्यमेन भाषमाणः दलस्य प्रवक्ता केसीत्यागी अवदत् यत् भाजपा-अध्यक्षः जेपी-नड्डा इत्यस्मै, केन्द्रीयमन्त्री राजनाथसिंहाय च मन्त्रिमण्डल-निर्माणसम्बद्ध-विषये एनडीए-ग्रन्थिबन्धनस्य नेतृभिः सह सम्वादस्य दायित्वं प्रदत्तम् अस्ति, अस्मिन् विषये च सभाः क्रियन्ते। सः अवदत् यत् जदयू-दलं बिहारस्य कृते विशिष्टं स्थानं इच्छति यतः एतत् राज्यात् दरिद्रता, प्रवास चेत्यादि-विषयान् सम्बोधयितुं साहाय्यं करिष्यति।

## WEATHER:

भारतीय-ऋतुविज्ञानविभागेन भविष्यवाणी कृता अस्ति यत् आगामि-षट्-दिवसेषु भारतस्य उत्तर-पूर्वक्षेत्रे, उप-हिमालयी-क्षेत्रे,पश्चिमबंगाले, सिक्किमे च व्यापक-रूपेण न्यूनतः मध्यमवृष्टेः सम्भावना अस्ति। उत्तर-पश्चिम-भारते अपि श्वः यावत् केषुचित् स्थलेषु वृष्टेः अल्पवृष्टेः च सम्भावना अस्ति। भारतीय-ऋतुविज्ञानविभागेन प्रोक्तं यत् आगामि द्वि-त्रितयम् दिवसेषु जम्मू-कश्मीर-लद्दाख-गिलगित-मुजफ्फराबाद, हिमाचल प्रदेश,उत्तराखंड राज्येषु अपि एतादृशी एव स्थितिः भवितुं शक्नोति । भारतीय-ऋतुविज्ञानविभागेन प्रोक्तं यत् आगामि द्वि-त्रितयम् दिवसेषु मध्य प्रदेश, उत्तर प्रदेश, झारखंड, पंजाब, हरियाणा, राजस्थान, ओडिशाराज्येषु उष्णलहरी यथावत् प्रचलिष्यति।

## <> फीफा क्वालीफायर:

अनुभवसम्पन्नः फुटबॉल-क्रीडकः सुनील-छेत्री अद्य सायं कोलकातायां कुवैतं विरुध्य महत्वपूर्णस्य फीफा-विश्व-चषकस्य प्र-प्रागुपान्त्यचक्रे अन्तिमवारं भारतीयदलस्य नेतृत्वं करिष्यति । क्रीडास्पर्धा सायं सप्त-वादने समारप्स्यते । सुनीलछेत्री इत्यस्य सेवानिवृत्ति तस्य उल्लेखनीयानां नवदशवर्षाणां अन्तराष्ट्रिय-क्रीडायाः अवसानसमयः अस्ति। अवधेयं यत् भारतं, वर्तमानसमये

चतुर्षु क्रीडास्पर्धासु चत्वारि अंकैः सह समूह-अ इत्यस्मिन् द्वितीये स्थाने वर्तते सहैव विश्व-चषके विजयस्वप्नं साकारं कर्तुं तेन एकः विजयः अपेक्षितः अस्ति।

**लक्ष्यभेदनस्पर्धा**

लक्ष्यभेदनस्पर्धायां सरबजोतसिंहेन पुरुषवर्गे दशमीटरपरिमितस्य लक्ष्यस्य भेदनं कृत्वा स्वर्णपदकं च विजित्य जर्मनीदेशसस्य म्यूनिखे आईएस्एस् एफ् विश्वचषके भारतस्य पदार्पणं कारितम् ।द्वाविंशति-वर्षीयेण क्रीडकेण अष्टक्रीडकानां अन्तिमक्रीडाद्वन्द्वे चीनस्य बू-शुआईहांग् इत्येषः शून्य-दशमलवं-द्वयङ्केन पराजितः।

**।। इति वार्ता: ।।**